# Shri Ganesha Manasa Puja Stotram

# શ્રીગણેશમાનસપૂજાસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Manasa Puja Stotram

File name : gaNeshamAnasapUjAstotram.itx

Category : ganesha, chandrashekharabhAratI, pUjA

Location : doc_ganesha

Author : chandrashekharabhAratI

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Sri Gururaja Sukti Malika

Latest update : June 3, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# શ્રીગણેશમાનસપૂજાસ્તોત્રમ્

શ્રીજગદ્ગુરુ શ઼ૃઙ્ગેરી
શ્રીચન્દ્રશેખરભારતી સ્વામિ અનુગૃહીતા

વાત્સલ્યભાજનમગાધિપકન્યકાયા
    માત્સર્યશૂન્યહૃદયૈર્ભુવિ ભાવનીયમ્ ।
પ્રત્યૂહજાતવિનિપાતનલબ્ધવર્ણ-
    મત્યૂર્જિતં હૃદિ ભજામિ ગણાધિનાથમ્ ॥ ૧॥

આવાહયામિ ગણનાથમુમામહેશ-
    સર્વસ્વભૂતમપનીતદુરન્તરાયમ્ ।
યોગીન્દ્રમાનસસરોરુહંસવિકાસ-
    લીલાવિશેષચતુરં નિગમાન્તનિષ્ઠમ્ ॥ ૨॥

માણિક્યમઞ્જુલમરીચિમનોજ્ઞપાર્શ્વં
    સાન્દ્રીભવન્મરકતાવલિમેચકાભમ્ ।
મુક્તામણિપ્રકરમેદુરિતાન્તરાલં
    રત્નાસનં તવ હૃદા પરિકલ્પયામિ ॥ ૩॥

ગઙ્ગાદિપુણ્યસરિતાં પરિપૂતતીર્થૈઃ
    પાદ્યં તવાદ્યવધિશૂન્ય સમર્પયામિ ।
અર્ઘ્યં દદામ્યહમનર્ઘગુણાભિરામ
    પ્રત્યૂહવારણ સુવારણવક્ત્ર તુભ્યમ્ ॥ ૪॥

પ્રત્યાહૃતૈરખિલપુણ્યસરિદ્વરાભ્ય-
    સ્તીર્થૈર્દદામ્યમલમાચમનં ચ તુભ્યમ્ ।
સૂક્તાદિમન્ત્રનિવહૈરભિમન્ત્રિતૈશ્ચ
    પુણ્યોદકૈસ્તવ શિરઃ સ્નપયામ્યજસ્રમ્ ॥ ૫॥

આચૂડમાચરણમપ્યભિષિચ્ય તીર્થૈઃ
    આલોક્યન્નખિલમઙ્ગલમાનનં તે ।

આનન્દનિર્ભરમનાશ્ચુલુકીકૃતાક્ષઃ
    કિં વા ભવામિ સફલીકૃતપુણ્યજન્મા ॥ ૬॥

કસ્તૂરિકાઘુમુઘુમીકૃતચન્દનાનિ
    દિવ્યં દુકૂલયુગલં ચ દદામિ તુભ્યમ્ ।
યજ્ઞોપવીતમભિમન્ત્રિતમર્પયામિ
    દિવ્યાન્શ્ચ ભૂષણગણાન્ પ્રતિપાદયામિ ॥ ૭॥

જાતિસુચમ્પકસરોરુહકુન્દમલ્લી
    બિલ્વાદિભિર્બહુવિધૈરિતરૈશ્ચ પુષ્પૈઃ ।
ત્વામર્ચયન્નમરસંહિતસેવ્યમાનં
    આરાદ્ભજામિ તુ કદા કૃતકૃત્યભાવમ્ ॥ ૮॥

સ્વામિન્ દદામ્યગરુગુગ્ગુલુચન્દનાદિ
    ધૂપાન્ સુગન્ધભરિતાન્ શિવસૂનવે તે ।
આજ્યપ્લુતામલસુવર્તિભિરેધમાન-
    માદર્શયામિ નનુ તે તપનીયદીપમ્ ॥ ૯॥

ચોષ્યૈશ્ચ ભક્ષ્યનિવહૈશ્ચ કરમ્બિતં તે
    ભોજ્યં દદામિ ગણનાયક દિવ્યમન્નમ્ ।
આમોદકં ચ ગિરિજાસુત મોદકાનાં
    સ્વામિન્ પરશ્શતમપિ પ્રતિપાદયામિ ॥ ૧૦॥

આનમ્રનાકિગણમઞ્જુલમૌલિમાલા-
    નીરાજ્યમાનચરણદ્વય વિઘ્નહન્તઃ ।
કર્પૂરદીપનિવહૈસ્તવ પાદપદ્મં
    નીરાજયામિ નનુ માં પરિપાહિ ભક્તમ્ ॥ ૧૧॥

પુષ્પાઞ્જલિં પ્રચુરયામિ સુવર્ણપુષ્પૈઃ
    સન્મન્ત્રપુષ્પમપિ ચ પ્રતિપાદયામિ ।
સર્વોપચારપનિવહાંશ્ચ સમર્પયામિ
    સ્વામિન્ ગણાધિપ સમુદ્ધર માં ભવાબ્ધેઃ ॥ ૧૨॥

નારોગ્યમદ્ય કલયે ન ચ ભોગ્યજાતં
    ભાગ્યં ન વા વિષયલમ્પટતાનિદાનમ્ ।
વૈરાગ્યમેવ સુતરામુપલમ્ભયન્ માં
    સ્વામિન્ સમુદ્ધર ભવામ્બુનિધેર્દુરન્તાત્ ॥ ૧૩॥

ઇત્થં ગણાધિપતિમાનસપૂજનં યઃ
    કૈવલ્યદં સુલલિતં પઠતીહ ભક્ત્યા ।
નાગામિજન્મભયમસ્તિ હિ તસ્ય પુંસઃ
    કૈવલ્યસૌધમચિરાદનુવીક્ષતે સઃ ॥ ૧૪॥

ઇતિ શ્રીજગદ્ગુરુ શ્રીશ‍ૃઙ્ગેરીપીઠાધિપ શ્રીચન્દ્રશેખરભારતી
    શ્રીપાદૈઃ વિરચિતં શ્રીગણેશમાનસપૂજાસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

---

*Shri Ganesha Manasa Puja Stotram*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*